ऊर्द्ध्वज्ञुः	ऊर्द्ध्वजानुः
०	ऊन
०	ऊम
	ऊर्म
ऊर्म्मिः	तरंगः
	प्रकाशः
	आवेशः
	नाशः
	संकुचितवस्त्ररेखाः
	वेदना
	औरवरः
	वेगः
ऊर्म्मिका	मुद्रिका
	संकुचितवस्त्ररेखा
	तरंगः
ऊर्म्मिमत्	वक्रं
०	ऊय
	ऊर
ऊरुः	ऊरुः
	सक्थि [illegible]
ऊरुपर्वा	जानुः
०	ऊल
०	ऊष

ऊष: क्षारस्यातका

ऊषर: ऊषर:
ऊषवान्
ऊष:

० ऊस

ऊहे

ऊह: तर्क:

० ऊक्ष:

इतिश्रीकाशीनाथपंडितेंद्रविरचितशब्दसंदर्भसिंधोऊकार:तरंग:षष्ट:॥६॥अथऋकांत:॥

ऋ
ऋ निंदा
दैत्यमाता
वाक्यं
देवमाता

ऋक्
ऋक् ऋग्वेद:
रिचा

ऋक्थं धनं

० ऋख

० ऋछ

ऋज

ऋजु: ऋजु:
अजिह्म:
प्रगुण:

० ऋझ

० ऋढ

ऋण
ऋणं ऋणं
उद्धार:
पर्युदंचनं

ऋत
ऋतं सत्यं
उंछशीलं
जलं
दीप्त:
पूजित:

ः

दा

ऋतुः	वसंतादिषट्ऋतुः
	रजस्वलापुष्पं
	भाषितं
ऋते	वर्जनं
०	ऋथ
०	ऋद
	ऋद
०ऋद्धं	राशीकृतधान्यं
ऋद्धि	ओषधिभेदः
	समृद्धिः
ऋभुक्षा	इंद्राणी
०	ऋन
०	ऋश
	ऋष
ऋश्य	मृगभेदः
ऋषभ ४	ओषधिभेदः
	स्वरभेदः
	वृषः
	कर्णरंध्रः
	कुंभीरपुच्छं
	परांतस्थः श्रेष्ठवाचकः
ऋषभा	नराकारस्त्री
	शूकशिंबी
	शिराला
	विधवास्त्री [illegible]
ऋष्यप्रोक्ता	शूकशिंबी
	शतपर्वी [illegible]
	अतिबला ओषधी
ऋषिः	सत्यवक्ता
	वेदः
	दीप्तिः
ऋष्टि	शस्त्रभेदः
	खड्गः
०	ऋस
	ऋह
	ऋक्ष
ऋक्षः	कुलाद्रिभेदः
	भल्लूकः
	आरलुः
	क्षतच्छिद्रः
ऋक्षं	नक्षत्रं
ऋक्षर	जलधारा
	द्विजातिः
ऋक्षगंधा	वृद्धदारकः

[illegible]

४२

४३

ॡ	दानवमाता
ल	देवयोनिः
ऌदि	दितिः
	अदिति
	देवयोनिः

इति श्रीकाशीनाथपंडितेन विरचिते शब्दसंदर्भसिंधौ ऌकारादि ऌकारांतः सप्तमस्तरंगः॥७॥

अथैकारमाह॥

ए

ए	आमंत्रणं
	आह्वाने
	स्मृतिः

एक

एकः	भिन्नार्थः
	श्रेष्ठः
	केवलः
	इतरः
	संख्यांतरं
एककः	एकाकी
एकदा	एककालं
एकपदं	तत्कालं
	मार्ग
एकतानः	एकाग्रं
एकपिंगः	कुबेरः
एकतालः	नृत्यगीतवाद्यानांसाम्यंयत्रः
एकसर्गः	एकाग्रं
एकहायनी	एकाब्दागोः
एककुंडलः	मलभद्रः
	कुबेरः
एकाग्रं	एकाग्र [illegible]
	एकतालः
	अनन्यवृत्तिः
	एकाग्रं
	एकायनगतः
	एकायनः
	एकसर्गः
एकाग्रं	अनन्यवृत्तिः
एकाग्रं	अनाकुलं
एकाष्ठीली	पाठाओषधिभेदः
	आस्तिपुष्पं
एकांतः	अतिशयः
एकाकी	एकाकी
	एकः
	एककः

एकागारिकः	चौरः
एकायनगतः	एकाग्रं
०॥	एवः
०॥	एठ
	एड
एडः	बधिरः
एडकः	मेषः
एडगजः	प्रपुंनाडः
एडमूकः	श्रवणकथनासमर्थः शठः
एडूकः	अंतःस्थितकीकसचितिः
०	एढ
	एण
एणः	मृगविशेषः मृगः
	एत
एतः	कर्बुरः आगतः
एतर्हि	एतस्मिन्काले
०॥	एथ
०॥	एदृः
	एध
एधः	अग्निःसंदीपनकाष्ठादिः
एधितं	प्रवृद्धं
	एन
एनः	पापं अपराधः
०	एप
०	एय
	एर
एरंडः	एरंडः व्याघ्रपुच्छः गंधर्वहस्तकः उरुबूकः रुबुकः चंचुः पंचांगुलः मंडः वर्द्धमानः व्यडंबकः चित्रकः।

एलामातुकं

एला — एला
एलीका
चंद्रबाला
निष्कुटीः
बुला

एलापर्णी — एलापर्णी [illegible]
सुवहा
रास्ना
युक्तरसा

एव

एवं — प्रकारः
ज्ञानावधारणं
अभिमतः
साम्यं
इत्यमर्थः
इवार्थः
उद्यमः
अंगीकारः

एश — [illegible]
॥ — एष
एषणी — तुला

एषणिका — नाराची

॥ — एतस्य

इतिश्रीकाश्मीरपंडितेंद्रविरचिते शब्दसंदर्भसिंधो एकारतरंगो प्रथमः॥ ८॥ अथ ऐकारतरंगमाह

ऐ — आमंत्रणं
आह्वानं
स्मृतिः
॥ — ऐक
॥ — ऐछ
ऐण

ऐणं — मृगचर्मादिः
ऐणेयं — मृगचर्मादि
ऐत
ऐतिह्यः — ऐतिह्यः
इतिह
॥ — ऐथ
ऐद
ऐंद्रिः — काकः

ॐ ऐच

ॐ ऐद्य

ऐन्द्रि ॐ ऐथ

ऐर

ऐरावतः ऐरावतः

अभ्रमातंगः

ऐरावणः

अभ्रमुवल्लभः

ऐरावतः नागरंगः

लकुचदृक्षः

सर्प्पभेदः

ऐरावतं महेन्द्रस्यरुजुदीर्घधनुः

ऐरावती विद्युत

नदीभेदः

ऐल

ऐलविलः कुबेरः

ऐलेयं एलवालुकं

ॐ ऐव

ऐश

ऐश्वर्यं संपत्तिः

ऐष

ऐषमः अस्मिन्वत्सरे

ॐ ऐस

ॐ ऐह

ॐ ऐक्ष

इतिश्रीकाशीनाथधिरपंडितेन

विरचितेशब्दसंदर्भसिंधौ

एकारतरंगः नवमः॥९॥

अथोकारमादः

ओ

ओ संबुद्धिः

अनुमतिः

अभिमतिः

उपक्रमः

प्रणवः

आक्रांतं

ओक

ओकारः ओंकारः
प्रणवः
स्वरोत्स
०॥ ओग
०॥
ओघ
ओघः समूहः
जलवेगः
नृत्यभेदः
०॥ ओङ
०॥ ओछ
ओज
ओजः बलं
दीप्तिः
०॥ ओझ
०॥ ओढ
ओड्रपुष्पं ओड्रपुष्पं
जवा
०॥ ओढ
०॥ ओण
ओत
ओतुः विडालः
०॥ ओथ
ओद
ओदना बाला
मेदिनी
ओदनं भक्तं
०॥ ओध
०॥ ओन
ओप
ओपः दाहः
ओष्ठः ओष्ठः
अधरः
रदनछदः
दशनवासः
ओषधिः फलपाकांतवनस्पतिः
ओषधीशः चंद्रः
०॥ ओस
०॥ ओह्न

इतिश्रीकाशीनाथपंडितेनद्वि
रचिते [illegible]
कारस्तरंगः दशमः॥१०॥

संवुद्धिः
आह्वाने

॰ ओक

॰ ओड

ओघ

औचित्यं उचितं
सात्यं

॰ ओज

॰ ओत

औत्तानपादिः ध्रुवः

॰ ओथ

ओद

औदनिकः सूपकारः

औदश्वितं संस्कृतव्यंजनं

औदरिकः औदरिकः
आद्यूनः
विजिगीषाविवर्जितः

औदश्वित्कं संस्कृतव्यंजनं

ओध

और्ध्वदेहिकम् पितृप्रेतहेतुकदानं

॰ ओन

ओप

औपयिकं न्याय्यं

औपगवकः औपगवसमूहः

॰ ओफ

॰ ओब

ओभ

औम्यं उमाक्षेत्रं

॰ ओय

ओर

औरसः औरसपुत्रः

औरभ्रकं मेषसमूहः

॰ ओल

॰ ओव

ओश

औशीरं शयनं
आसनं
उशीरजचामरदण्डं

ओष

औष्ट्रकं
औषधं
०॥ औस
०॥ औद
औश
औष्ट्रकं उष्ट्रसमूहः

इति श्रीकाशीनाथपंडितेन्द्रवि
रचिते शब्दसंदर्भसिंधौ औका
रस्तरंगः एकादशः ॥११॥
अथ ककारतरंगः १२

क

कः विष्णुः
ब्रह्मा
वायुः
आत्मा
यमः
दक्षः
सूर्यः
मयूरः
अग्निः
कामग्रंथिः
गरुडः

कं सुखं
मस्तकं
जलं

कक

कंकः कपटब्राह्मणः
पक्षिविशेषः
यमः
युधिष्ठिरः

कर्कः कर्कराशिः
अधोभागः
अग्निः
श्वेताश्वः
दर्पणः
कुंभः

कर्कटी ओडभेदः

कर्करः दर्पणः
कठिनः

कंकणं कंकणं
करभूषणं

कंकणं सूत्रं

	...पलाश्वतरुः
२ कर्कवटं	कठिनं २
१ क्रकरः	करीरवृक्षः १
	दीनः १
	करपत्रं १
	क्रकरणः १
कर्कन्धुः	वदरी
कर्कशः	इक्षुः
	साहसिकः
	पिप्पलः
	काशमर्दः
	क्रूरः
	परुषः
	कृपणः
	निर्दयः
	दृढः
	रूक्षः
कर्कोटकः	कर्कोटकः
	कुलीरः
कर्कटः	पक्षिभेदः
	राशिभेदः
	शाल्मलीफलं
	वालुकी
	कुलीरः
कर्कटी	कर्कटी
	एर्वारुः
कंकटकः	कवचं
कर्करेटुः	कर्करेटुः
	करेटुः
कंकतिका	कंकतिका
	प्रसाधनी
कर्कारुः	कूष्मांडः
ककुभ्	दिशा
	शोभा
	चंपकस्रक्
	वेणी
ककुभः	रागभेदः
	वीणांगः
	अर्जुनवृक्षः
ककुदः	वृषांगं
	राजचिह्नं
	पर्वताग्रं
	प्राधान्यं

ककुत्	वृषांग
	राजचिन्हं
	पर्वताग्रं
	प्राधान्यं
कर्कटः	पंकः
	शिवः
	करहाटः
ककुद्मती	कटीः
कंकेलिः	अशोकः
कर्कोटकः	श्रीफलं
	सर्प्पभेदः
कंकोलकं	कंकोलकं
	कोलकः
	कोषफलं
०।	करव
	कग
कंगुः	कंगुः
	प्रियंगुः
०।	कथ
०।	करु
	कच
कच	केशः
	बृहस्पतिपुत्रः
	बंधः
	शुष्कव्रणः
कच्चरं	कच्चरं
	मलदूषितं
कचपाशः	केशसमूहः
कचा	हस्तिनी
कचाकुः	दुराधर्षः
	दुष्टस्वभावः
	सर्प्पः
कच्चित्	कामप्रवेदनं
कंचुकः	निर्मोकः
	कवचः
	वारवाणः
	वर्द्धापकग्रीहीतांगः
	चोलकः स्फितवस्त्रं
कंचुकी	अंतःपुराध्यक्षः
	विट्
	ओषधिभेदः
	सर्प्पः
कच्छूरकः	कच्छूरः
	द्राविडकः
	[illegible]
	वेधमुख्यकः

कछ

कच्छुः	कच्छुः
	सन्नपः
कच्छुः	नौकांगः
	कुमभेदः
	परिधेयवस्त्रंचलपल्लवं
कच्छपः	कच्छपः
	कूर्मः
	कमठः
कच्छपः	निधंतरं
	मल्लः
	बंधांतरं
कच्छपी	वीणाभेदः
	कूर्मी
	क्षुद्ररोगांतरं
कच्छा	कौपीनं
	वाराही
	चीरिका
कच्छुः	विचर्चिकाः
कच्छुरः	पामारोगयुक्तः
	कच्छुकुलदेच्याः
	पुंश्चलः
कच्छुरा	स्वकशिंबी
	कच्छुरकः
	यवासः

कजः

कंजः	केशाः
	ब्रह्मा
	अमृतं
	कमलं
कंजारः	जठरः
	सर्पः
	ब्रह्मा
	हस्ती
	मुनिः
०	कञ
०	कञ

कट

कटः	कटः
	किलिंजकः
कटः	श्रोणिः
	गजगंडः
	अतिशायः
	शरः
	समयः

कटभी	ज्योतिष्मती

कट्वंगः

कटपूः — [illegible]कुष्माण्डं
राक्षसः
विद्याधरः
महादेवः
अक्षक्रीडनं

कटुफलं — कट्फलं
श्रीपर्णिका
कुमुदिका
कुंभी
कैटर्यः

कटकः — अर्द्धः नितंबः
हस्तिनां दंतमंडनं
सामुद्रलवणं
राजधानी
कंकणं
रथचक्रं
सेना

कंटकः — रोमांचः
क्षुद्रांगः
मत्स्यादिकीकस्थं
नियुक्तस्य दोषकथनं
क्षुद्रशत्रुः
स्वच्यग्रं [illegible]

कंटकी — मत्स्यः

कंटकारी — प्रसारिणी
रोहिणी — कुटकी इति ख्याता
हस्तिनी
कलंबी — शाकभेदः
मंडूकी
सर्वा — तेजनी
गोल — मनःशिला

कटभंगः — सस्यच्छेदः
नृपात्ययः

कंटकिफलं — पनसवृक्षः

कटखादकः — खादकः
काचकलशं
काकः
जंबुकः

कंटकारिका — कंटकारिका
निदिग्धिका
स्पर्शी
व्याघ्री
बृहती
प्रचोदनी
कुली
क्षुद्रा
दुःस्पर्शा
राष्ट्रिका

	...ोव:
कटाहः	कूर्मपृष्ठः
	द्वीपभेदः
	महिषीशिशुः
	तैलपाकपात्रं
कटिः	कटिः
	कटः
	श्रोणिः
	ककुद्मती
कटित्रं	रशना
	चर्मैकदेशः
	कटिसंलग्नवस्त्रं
कटिप्रोथः	कटिप्रोथः
	स्फिक्
कटी	पिप्पली
	हस्ती
कटुः	कटुरोहिणी
	लता
	राजिका राई
	अकार्यं
	रसमात्रं
	सुगंधिः
	मत्सरः
	गर्दभः
	तीक्ष्णं
	कटुरसः
	पटोलः
कटुका	कटुरोहिणी
	त्रिकटुः
कटुकंदः	शिग्रुः साहिजनेतिख्यातः
	शृंगवेरः
	लशुनः
कटुतुंबी	कटुतुंबी [illegible] [illegible]
	इक्ष्वाकुः
कटुरोहिणी	कटुरोहिणी
	कटुः
	कटंभरा
	अशोका
	रोहिणी
	मत्स्यपित्ता
	कांडभेदी
	चक्रांगी
	शकुलादनी [illegible]

५६

कठ

कः	मुनिभेदः
	कठप्रोक्तवेदशाखा
	स्वरभेदः
कंठः	विप्रः
	गलः
	सन्निधानः
	ध्वनिः
	मदनवृक्षः
कंठभूषा	कंठभूषा
	ग्रैवेयकं
कंठाला	गोणीभेदः
	उष्ट्रः
कंठालः	सूरणः
	युद्धं
	नौका
	खनित्रकः
कठिनः	निष्ठुरः
	जडः
कठिनी	स्थाली
	खटिका
कठिना	शर्करा
कठिल्लकः	पर्णाशः
	भेकः
	कारवेल्लः
कठिंजरः	पर्णाशवृक्षः
कठोरं	कठोरं
	कठिनं
	करखटं
	क्रूरं
	निष्ठुरं
	दृढं
	जरठं
	मूर्त्तिमत्
	मूर्त्तं

कड

कडंबः	धान्यस्तंबः
कटंगवः	बुषं
कडारः	कपिलः
	सालवृक्षः
कंडूः	कंडूः
	खर्जूः
	कंडूया
कंडरा	[illegible]

कंडाल:	कंडोल:
	पिट:
कंडोलवीणा	चंडालवीणा

कण

कण:	सूक्ष्मधान्यांश:
	अल्पांश:
कर्ण:	कर्ण:
	श्रोत्रं
	श्रव:
	शब्दग्रह:
	श्रुति:
	श्रवणं
कर्ण:	सुवर्ण
	कुंत्यां ज्येष्ठपुत्र:
क्वण:	क्वण:
	निष्काण:
	निःक्वण:
	क्वाण:
	क्वणनं
कर्णधार:	कर्णधार:
	नाविक:
कर्णपूर:	शिरीष:
	नीलोत्पलं
	अवतंस:
कर्णवेष्टनं	कुंडलं
कर्णजलौका	कर्णजलौका
	शतपदी
कणा	जीरक:
	कुंजीर:
	मक्षिका
	पिप्पली
	द्राक्षा
कणाद:	मुनिभेद:
	स्वर्णकार:
कर्णान्दु:	उत्क्षिप्तिका
	रुक्मपाञ्ची
कणिका	अतिसूक्ष्मवस्तु
	अग्निमंथ:
कणिशं	शस्यमंजरी

कर्णिका

५० कर्णिः

५२

शुंडाग्रं
करिहस्ताङ्गुलिः

कर्णिकारः कर्णिकारः
परिव्याधः

कर्णिकारः आरग्वधः
द्रुमोत्पलं

कर्णाचि: पुष्पितलता
गुञ्जा
चाकटः

कर्णीरथः कर्णीरथः
प्रवहनं
वहनं

कर्णेजपः सूचकः

कर्त

कर्त्तन छिद्रं
सूत्रनिर्माणं

कर्त्तरी कर्त्तरी
कर्पास

कर्त्ता कारकः
प्रजापतिः

क्रतु यज्ञः
मुनिः

क्रतुभुक् देवः

क्रतुध्वंसी शिवः

कल्हारं कल्हारं
पोरः
सौगंधिकः
श्याम
देवजग्धकं
रौहिषं

कल्हारं अल्पतनुः

कर्कटिका क्षुद्रखड्गः

कथ

कथं प्रश्न
संभ्रमः
उत्पत्ति
प्रकारः

क्रथनं मारणं

कथा कथा

?ितं — क्षथनः
निष्क्वकः

कर

कंदः — सूरणः
सस्यादिमूलं
मेघः

कदनः — कदर्यः
पापः

कंदरा — कंदरा
दरी

कंदरः — कंदरी
अंकुशः

कंदलं — कपालः
नवांकुरः
उपरागः
कलध्वनिः

कंदली — मृगभेदः
गुल्मभेदः
पताका

कदला — बिंबिका

कदलः — शाल्मलीवृक्षः

कदली — पताका
कदली
रंभा

कद्वदः — कुत्सितवक्ता

कर्दमः — कर्दमः
निषद्वरः
जंबालः
पंकः
शादः

कदध्वा — कदध्वा
व्यध्वः
दुरध्वः
विपथः
कापथः

कंदर्पः — कामः

कदर्यः — कृपणः

कदंबः — कदंबः
नीपः
प्रियकः
हलिप्रि...

कदंबः समूहः
सर्षपः

कद्दरः श्वेतखदिरः
करपत्रं
रोगभेदः

क्रंदनं रोदनं
आह्वानं
योधसंरावा

करंबकः समूहः
सर्षपः

कंदरालः आर्द्रगोंडं
लसत्कः

कंदरालुः पर्वतजन्यपीलुवृक्षः

कदाचित् कदाचित्
जातुः

क्रंदितं रुदितं

कद्रु कपिलवर्णः
स्वर्णपिंडं

कंदुः कंदुः
स्वेदनी
अग्निष्ठः

कदुष्णं ईषदुष्णं

कंदुकः कंदुकः
गेंदुकः

कद्रूः नागमाता

कध

कंधरः मेघः

कंधरा कंधरा
ग्रीवा
शिरोधिः

कन

कनकं जीबीरं
सुवर्णं
किंशुकः
नागकेसरः
धत्तूरः
कांचनारः
चंपकः
कालीयकः

कनकालुकः भृंगारः

कन्या

कन्या	कन्या
	कुमारी
	राशिभेदः
	स्त्री
	ओषधिभेदः
कनिष्ठः	कनिष्ठः
	जघन्यजः
	यवीयः
	अवरजः
	अनुजः
	अतियुवा
	अल्पः
	अंगुलिः
कनीयः	अल्पः
कनीनिका	अक्षितारका
कंपनं	कंपनं
	चलनं
	कंप्रं
	कंप
कपर्दकः	वराटः
	शिवजूटाजूटः
कपाटः	कपाटः
	अररं
	कवाटः
कपालः	कपालः
	कर्परः
	घटादिखंडं
	समूहः
	कुष्ठरोगभेदः
कपालभृत	शिवः
कपिः	वानरः
	विष्णुः
	सिह्लकः
कपिला	रेणुका ओषधि
	शिंशपा

१०

कर्णि:

5a

	कुंजाग्रं
	करिहस्तांगुलिः
कर्णिकारः	कर्णिकारः
	परिव्याधः
कर्णिकारः	आरग्वधः
	द्रुमोत्पलं
कर्णीचिः	पुष्पितलता
	गुञ्जा
	चाकटः
कर्णीरथः	कर्णीरथः
	प्रवहनं
	डयनं
कर्णेजपः	सूचकः

कत

कर्त्तन	छिद्रं
	सूत्रनिर्माणं
कर्त्तरी	कर्त्तरी
	कर्पास
कर्त्ता	कारकः
	प्रजापतिः
क्रतु	यज्ञः
	मुनिः
क्रतुभुक्	देवः
क्रतुध्वंसी	शिवः
कत्तृणं	कत्तृणं
	पौरः
	सौगन्धिकः
	ध्याम
	देवजग्धकं
	रौहिषं
कत्तृणं	अल्पतनुः
कर्त्तृका	क्षुद्रखड्गः

कथ

कथं	प्रश्न
	संभ्रमः
	उत्पत्ति
	प्रकारः
क्रथनं	मारणं
कथा	कथा

कपोतः	कपोतः
	पारावतः
	कलरवः
	ओघः
कपोलः	अजनांतरं
	कपोलः
	गंडः
कपोतांघ्रिः	कपोतांघ्रिः
	सुषिरा
	विद्रुमलता
	नटी हिं०
	नली हिं०
कपोतपालिका	कपोतपालनस्थानं
	कफ०
कफः	कफः
	श्लेष्मा
	रसांत्राः
कफी	कफी
	श्लेष्मलः
	श्लेष्मलः
कफोणिः	कफोणिः
	कूर्परः
	कंब०
कंबलः	कंबलः
	रल्लकः
	सर्पराजः
	गलकंबलः
	प्रावारः
	कृमिः
	उत्तरासंगः
	जलं
कंबली	वृषवालशकटः
कबंधः	अमस्तकक्रियायुक्तशरीरं
	जलं
	उदरं
	राहुः
	राहुसमेदः
कंबुः	गजः
	शंखः
	वलयः

कर्बुरं — स्वर्णं
जलं

कर्बुरः — पापः
राक्षसः
शंखः
शबलः
हरितालः

कर्बुरा — कृष्णवृंता

कंबुग्रीवा — त्रिरेखायुक्तग्रीवा

कर्बूरः — शठी

कंबोजः — शंखः
देशभेदः
हस्तिभेदः

कम०

कंभः — मस्तकपिंडं

कम०

कर्म — क्रिया
न्याय्यं

कम्रः — कामुकः

क्लमः — ग्लानिः

क्रमः — परिपाटी
शक्तिः
चलनं
कंपः
आक्रमणं
वेदांगः

कमनः — कामुकः
कामः
मनोहरः
अशोकवृक्षः

कमठः — कच्छपः
भांडभेदः

कमठी — कमठी
दुलिः

कमलं — जलं
ताम्रं
पद्मं
भेषजं
मृगभेदः

कमला	लक्ष्मीः
	वरस्त्री
कर्मंदी	भिक्षुः
कर्मण्या	वेतनं
क्लमथः	ग्लानिः
कर्मठः	कर्मशूरः
कर्मक्षमः	कर्मक्षमः
	अलंकर्मीणः
कर्मकरः	कर्मकरः
	भृतकः
	भृतिभुक्
	वैतनिकः
	भरण्यभुक्
कर्मकारः	कर्माध्यक्षः
कमंडलुः	कमंडलुः
	करकः
	प्रस्रुतरुः
कर्मफलं	कर्मरंगः
	कर्मविपाकः
कर्मकरी	मूर्वा
	दासी
	बिंबिका
कर्मसाक्षी	सूर्यः
कमलासनः	ब्रह्मा
कर्मसचिवाः	अमात्याः
कर्मारः	जातिभेदः
	वंशः
कृमिः	पट्टवस्त्रयोनिः
कमिता	कामुकः
क्रमुकः	भद्रमुस्तकः
	पलाशकाष्ठ
	कर्पासफल
	लोध्रभेदः
	गुवाकः
कर्मेंद्रियं	वाक्
	पाणिः
	पादः
	पायुः
	उपस्थः

क्रमेः	क्रमु

क्रमु

क्रयं	क्रयप्रसारितद्रव्य

क्रयविक्रयिकः	वणिक्

क्रयिकः	द्रव्यक्रेता

करः	करः०

वर्षोपलः

हस्तः

किरणः

शुंडः

राजग्राह्यभागः

करटः	द्रुमगंडः

काकः

कुसुंभं

निंद्यजीवी

हस्ती

करकः	दाडिमः

कमंडलुः

पक्षिभेदः

करंकः	मस्तकं

सस्यं

नारिकेरफलास्थि

करंडः	मधुकोशः

खड्गः

अलाबुः

करंजकः	करंजकः

चिरबिल्वः

नक्तमालः

करजः

करजं	व्याघ्रनखः

करजः	नखः

करंजः

करणं	हेतुः

कर्म

वालवादिः

हस्तलेपः

नृत्यभेदः

गीतभेदः

क्रियाभेदः

इंद्रियं

क्षेत्रं

	शूद्राविट्गोसुतः
करभः	करस्य बहिर्भागः
	वानरभेदः
	करिशावकः
	उष्ट्रशिशुः
	दशवर्षबंधनष्ट्रबालकः
करंभः	दधिसक्तुः
करवीरः	करवीरः
	प्रतिहासः
	शतप्रासः
	चंडातः
	हयमारकः
	खड्गः
	दैत्यभेदः
	श्मशानभेदः
करवीरी	अदितिः
	श्रेष्ठागौः
	पुत्रवती
करताली	करताली
	कवर्दिः
करहाटः	करहाटः
	शिफाकंदः
	पद्मं
	मदनवृक्षः
कररुहः	नखः
करवालः	खड्गः
करपत्रं	करपत्रं
	क्रकचः
करशाखा	अंगुलिः
करतोया	करतोया
	सदानीरा
करभूषणं	कंकणं
करपालिका	क्षुद्रखड्गः
करमर्दकः	करमर्दकः
	कृष्णपाकफलं
	आविग्नः
	सुषेणः
करत्रीकरः	करत्रीकरः
	वमथुः

करालः — उच्चदंतः
उच्चः
भयंकरः
पक्षधूपः
तैलं
लोध्रं
कुठारः

करिला — करिला
धेनुका
वन्ना

करिपिप्पली — करिपिप्पली
कपिवल्ली
कोलवल्ली
श्रेयसी
वशिरः [illegible]

करिका — हस्तिदंतमूलं

करी — हस्ती

करीरः — करीरः [illegible]
क्रकरः
ग्रंथिलः
वंशांकुरं
घटः
हस्तिनां दंतमूलं
शिल्ली
वृक्षभेदः

करीषः — करीषः
शुष्कगोमयं

करुणः — रसभेदः
वृक्षभेदः

करुणा — दया

करेणुः — हस्ती
हस्तिनी
गजभूषणं

करेटुः — पक्षिभेदः

करोटः — वाद्यभेदः

करोतिः — त्रिरोत्रि

कलं०

कलः — शुक्रः
जीर्णः
अव्यक्तमधुरध्वनिः

कल्कः — पापाभिप्रायः
विट्

किंचिदुष्णं
पापः
घृततैलादिदोषः
विभीतकवृक्षः

कल्पः शास्त्रं
विधिः
न्याय्यः
प्रलयः
ब्रह्मदिनं

कल्यः प्रातःकालः
कात्स्न्यवलेन्द्रियरहितः
उपरक्षणं
रोगरहितः
चतुरः
उपायः
कल्याणं
मद्यं
वैदिकविधानं
समुचिताचरणं

कलत्रं भगं
श्रोणिः
भार्या

कल्मषं पापं
नरकान्तरं

कलमः लेखनी
शालिधान्यं
जीर्णवस्त्रं
चोरः
लाक्षारसः

कलंकः कलंकः
अंकः
लांछनं
चिह्नं
जल्मं
जल्पणं
अपवादः
लोहमलं

कलंबी शाकभेदः

कलंबः बाणः

कलनं सज्जीकरणं
संपादनं
दर्शनं

कललं गर्भवेष्टणचर्म

कल

56

खङ्गकोश:
खंडनं

कलश: कलश:
घट:
कुट: ऽ
निप: ऽ

कलशि: पृश्निपर्णी

कलध्वनि: पारावत:
कोकिल:
मयूर:

कलरव: कपोत:

कलविंक: चटक:
कुलिंग:

कलकंठ: मधुरध्वनि:
हंस:
कपोत:

कलहंस: कलहंस:
कादंब:

कलधौतं रौप्यं
स्वर्णं

कलकल: कोलाहल:
सजनिर्घोष:

कल्पवृक्ष: देववृक्ष:

कला मूलधनवृद्धि:
शिल्प:
अंशमात्रं
चंद्रस्य षोडशांश:
कालभेद:
चत्वारिंशदधिक पंचाशन्निमेषा:

कला शुभातिकाक्

कषाय: कषाय:
सतीलक:
हरेणु: ऽ
खंडिक: ऽ

कलाप: पिच्छ:
समूह:
मेखला

कल्पांत: प्रलय:

कल्याणं कल्याणं
श्व:श्रेयसं
शिवं
भद्रं
मंगलं
शुभं
भावुकं
भविकं
भव्यं
कुशलं
क्षेमं
शस्तं
अक्षयस्वर्ग:

कल्माष: नानावर्ण:
रूपाद:
राक्षस:

कलानिधि: चंद्र:
कलावान्

कलानुनादी भ्रमर:
कलविंक:
कपिंजल:

कलि: कलियुग:
शूरकलह:
कलिका
युद्धं

कलिका कलिका
कोरक:

कलिंग: देशविशेष:
भृंग:
धूम्याट:
कलिंग:
पूतिकरज:
कौरजफलं

कलिंगा स्त्री

कलिलं गहनं

कलिकार: धूम्याट:

कलिद्रुमः	विभीतकः
कलिकारकः	पूतिकरजः
कलुषः	पापं
	आविलं
कलेवरं	शरीरं
कल्लोलः	कल्लोलः
	उल्लोलः
कल्लोलः	हर्षः
	शत्रुः
	कव०
कव्यं	पितृदेयमन्नं
क्रव्यं	मांसं
कवचः	कवचः
	तनुत्रं
	वर्म
	दंशनं
	उरश्छदः
	कंकटकः
	जगरः
कवचः	गर्दभाण्डः
	सन्नाहः
	पटहः
कवलः	कवलः
	ग्रासः
कवरी	हिंगुपत्री
	बर्बरी
	केशवेशः
	उमा
कवरः	लवणः
	अम्लः
	राक्षसः
	पापः
	मेघजातरं
क्रव्यात्	राक्षसः
	अग्निः
क्रव्यादः	राक्षसः
कविः	वाल्मीकिः
	शुक्रः
	पण्डितः
	[illegible]
	खलीनः

कविः	वेधाः
	दक्षः
कविक	कविका
	खलीनः
कवोष्णं	ईषदुष्णं
	कश०
कश्यः	ताडनयोग्यः
	मद्यं
	अश्वमध्यभागः
कशा	ताडनरज्जुः
कशार्ह	कशार्हः
	कश्यः
कशिपुः	अन्नं
	आच्छादनं
कशेरुः	कलिकारः
	हस्तिनी
	वेरूपा
	तृणकंदः
कशेरुका	पृष्ठास्थिखंडं
	कष०
कषः	कषः
	शाणः
	निकषः
कर्षः	षोडशमाषकः
	कर्षणः
कष्टं	कष्टं
	कृच्छ्रं
	आभीलं
कष्टं	गहनं
कर्षकः	कर्षकः
	कृषकः
	क्षेत्राजीवः
	कृषीवलः
कर्षफलः	विभीतकतरुः
कषायः	कषायः
	तुवरः
	निर्यासः
	विलेपनं
	सुगंधिः
	[illegible]
	रक्तवर्णः

कर्बूः

कार्त्ती

कस०

कंसः — कांस्यद्रव्यं
अमुरभेद
पानपात्रं
मानभेदः

कंसारातिः — विष्णुः

कस्तूरी — कस्तूरी
मृगनाभिः
मृगमदः

कह्वः — बकः

कहूरः — निंदितः
नक्रः

कछ०

कछः — नदीकच्छः
महिषः
तटं
शुष्ककाननं
बाहुमूलं
लताप्रतानिनी

कक्षा — स्पर्द्धस्थानं
तर्कः
रथ्यभागः
कांची
परिधानवस्त्रांचलं
गजमध्यबंधनरज्जुः

कक्ष्या — गजमध्यबंधनरज्जुः
कांची
वृहतिका
हर्म्यादिप्रकोष्ठः

कक्षावेक्षकः — अंतःपुरं
रक्षोवनपालकः
रंगाजीवः
कविः
सूर्यः
खड्गः
द्वारपालकः

काक०

काकः — काकः
करटः

	ध्वाङ्क्षः
	आत्मघोषः
	बलिभुक्
	परभृत्
	वायसः
	वृक्षभेदः
	पंगुः
	शिरःप्रक्षालनं
	मानभेदः
	द्वीपभेदः
काकं	सुरतबंधः
	काकसमूहः
काकली	अल्पमधुरास्फुटरवः
काकपक्षः	काकपक्षः
	शिखंडकः
काकपुल	पुरूपणर
काकमाची	काकमाची
	वायसी
काकतिंदुकः	काकतिंदुकः
	काकेंदुः
	कुलकः
	काकपीलुकः
काकनासिका	काकनासिका
	काकांगी
काकरुकः	उलूकः
	इभ्य
	स्त्रीजितः
	दंभः
	नग्नः
	भयभीतः
	सर्पः
	राहुसः
काकचिंची	गुंजा
काका	काकजंघा
	रतिका
	कटुतुंबी
	काकमाची
	काकनासा
	मलपूः
काकांगी	काकोली
[illegible]	औषधिभेदः

एककराटकः
गुंजा
ऊर्द्धकानैकदेशः

काकु भयेनशोकेनवाध्वनिविकारः
कटाक्षः

काकुदं तालु

काकेंदुः तिंदुकभेदः

काकोलः द्रोणकाकः
विषभेदः
नरकांतरं
ओषधिभेदः
कुलालः

काकोदरः सर्पः

काकोदुंबरिका काकोदुंबरिका
फल्गुः
मलयूः
जघनेफला

काख
काउ
काच०

काचः काचः
क्षारः
शिक्यं
मणिः
नेत्ररुक्
रुग्भेदः

कांचनः कांचनारः
चंपकः
नागकेशरः
उदुंबरः
धत्तूरः

कांचनं पद्मकेसरः
स्वर्णं

कांचनी हरिद्रा

कांचनारः कांचनं

काचस्थाली पाटलिवृक्षः

कांचनाहूयः नागकेशरः

काचितं	शिक्यस्थवस्तु
कांचिघः	कांचनं मूषिकः
कांची	कट्याभरणं ग्रामभेदः पुरी
कांजिकं	कांजिकं आरनालं सौवीरं कुल्माषं अभिषुतं अवंतिसोम धान्याम्लं कुंजलं
ॐ	काम०
ॐ	काहु०
	काड०
कांडः	स्तंबः वृक्षशाखा बाणः अवसरः जलं निंदितः एकांतः वर्गः दंडः अश्वः
कांडवान्	कांडास्त्रयोद्धा
कांडपृष्ठः	शस्त्राजीवः
कांडीरः	कांडास्त्रयोद्धा
कांडेक्षुः	कांडेक्षुः इक्षुगंधा कोकिलाक्षः इक्षुरः क्षुरः [illegible]
ॐ	काठ०
	कीत०

	लोहः
	चंद्रकांतः
	सूर्यकांतः
	अयस्कांतः
कातरः	कातरः
	अधीरः
कार्त्तस्वरं	स्वर्णं
कांतलकः	अश्वत्थाकारवृक्षभेदः
कांता	मनोज्ञा
	स्त्री
	प्रियंगुः
कांतारः	दुर्गममार्गः
	छिद्रं
	महारण्यं
	इक्षुप्रभेदः
कार्त्तांतिकः	दैवज्ञः
कांतारकः	इक्षुभेदः
कात्यायनः	वररुचिः
	मुनिभेदः
कात्यायनी	भवानी
	काषायवस्त्राविधवार्द्धवृद्धा
कांतिः	शोभा
	इच्छा
कार्त्तिकः	कार्त्तिकः
	बाहुलः
	ऊर्जः
	कार्त्तिकिकः
कार्त्तिकेयः	कार्त्तियादि अमरकोशे पर्यायाः
	काथ०
क्वाथः	अतिदुःखं
	द्रवनिष्पाकः
क्वाथोद्भवं	तुत्थं
	काद०
कादंबः	बाणः
	[illegible]

कादंबिनी	काहली
	कोकिला मेघमाला
	सरस्वती
	सारिका
कांदविकः	भक्ष्यकारः
काद्रवेयः	सर्पः
कांदिशीकः	भयद्रुतः

ॐ काध०

काण०

काननं	वनं
	मोहः
	ब्रह्मवदनं
कानीनः	कन्याजः
	व्यासः
	कर्णः

काप०

कापथः	चोरयुक्तमार्गः
कापटिकः	अन्यमर्मज्ञशिष्यः
	शठः
कार्पासी	कार्पासी
	तुंडिकेरी
	समुद्रांता
	बदरा
कार्पासं	वस्त्रं
कांपिल्यः	कांपिल्यः
	कर्कशः
	चंद्रः
	रक्तांगः
	रोचनी
	नगरभेदः
कापिशायनः	देशभेदः
	मद्यभेदः
कापोतः	सर्जिकाक्षारः
	कपोतसमूहः
	जंबीरभेदः
कापोतांजनं	नेत्रांजनं

ॐ काफ०

कंबलं — कंबलावृतरूपः

कांबविकः — कांबविकः पुं
शांखिकः पुं

कावारं — शैवालं

कांबोजः — कंबोजदेशोद्भवोऽश्वः
श्वेतखदिरः
पुन्नागः

कांबोजी — माषपर्णी

ॐ

काम०
काम०

कामः — स्मरस्तु कामदेवपर्यायाः
अभिलाषः

कामं — यथेष्टं
अनुगमः
अनुमतिः
वीर्यं
असूया

कार्मः — कर्मकरणसमर्थः

कामनः — कामुकः

कार्मणं — कार्मणं
मूलकर्म

कामदा — कामधेनुः

कामदः — यथेच्छदाता

कामलः — रोगभेदः
मधु
वसंतः
कामुकः
मरुदेशः

कामपालः — बलरामः

कामगुणः — रोगभेदः
विषयाभोगः

कामकूटः — वेश्याप्रियः
विटुमः
विभ्रमः

कामंगामी — कामंगामी
अनुकामीनः

कामयिता — कामुकः

काम्यदानं — काम्यदानं
प्रवारणं

कामचारी — कामुकः
स्वछंदः
[illegible]

कावमी	कामुकः
	प्रीतिः
कामिनी	स्त्रीविशेषा
	वंदा
कामी	चक्रवाकः
	पारावतः
कामुकी	वृषस्यंती
कामुका	इच्छावती
कामुकः	कमिता
	अनुकः
	कम्रः
	अभीकः
	कमनः
	कम्पनः
	अभिकः
कामुकः	अशोकवृक्षः
	अतिमुक्तः
कार्मुकं	धनुः
कार्मुकः	वेणुः
	कर्मसमर्थः

काय॰

कायः	ब्रह्मा
	समूहः
	लक्ष्यं
	स्वभावः
	मनुष्यतीर्थं
	शरीरं
कार्यं	देहादिसमुदायः
	प्रयोजनं
	हेतुः
कायस्थः	परमात्मा
	[illegible]
कायस्था	हरितकी
कार्यपुटः	क्षपणकः
	उत्तमः
	अनर्थकरः
	उन्मत्तः
कायिकः	द्रव्यक्रेता

कार॰

कारः	वधः
	निश्चयः
	बलं
	यत्नः
	प्रीतिः

६१ ।

61/2

कारणं	हेतुः
	बीजं
	वधः
कारणा	गाढवेदना
कारकः	कार्यकर्त्ता
	कर्त्रादिषट्कं
कारवी	पृथ्वी
	कारवी
	वाष्पीका
	कवरी
	पथुः
	मधुरी
	कृष्णजीरकः
	मयूरशिखा
कारलिकः	परीक्षकः
कारवेल्लः	कारवेल्लः
	कठिल्लकः
	सुषवी
कारंडवः	जलपक्षी
कारंधमी	कांस्यकारः
	धातुवादरतः
कारा	दूती
	प्रसेवकः
	वंधनं
	वंधनगृहं
	स्वर्णकारः
कारिः	क्रिया
	शिल्पी
कारिका	नटस्त्री
	क्रिया
	विवरणश्लोकः
	शिल्पी
	यातना
कारीषं	जीविका
	करीषसमूहः
कारुः	कारकः
	विश्वकर्मा
कारुजः	शिल्पी

काल०

कालः	कालः
	दिष्टः
	अनेहा
	समयः
	मृत्युः
	महाकालः
	यमः
	कृष्णवर्णः
	कृष्णजीरकः
काल्यकः	कर्चूरकः
कालकः	कालकः
	जतुः
	पिप्लुः
कालकूटः	विषभेदः
कालसूत्रं	नरकभेदः
कालधर्मः	मरणं
कालसेयं	तक्रं
कालमेषी	बाकुची
कालखंडः	कालखंडं
	यकृत्
कालकंठः	दात्यूहः
	कलविंकः
	खंजनः
	मयूरः
	पीतसारः
	शिवः
कालपृष्ठं	कर्णधनुः
कालपृष्ठः	कंकपक्षी
कालंजरः	योगीचक्रमेलकः
	पर्वतः
	भयंकरः
कालस्कंदः	तिंदुकवृक्षः
	जीवकवृक्षः
कालमेषिका	तमालवृक्षः
	जिवा

कालागुरु — कालागुरु
अगुरु
कालायस: — लोह:
कालानुसार्यं — शैलेयं
शिंशपावृक्ष:
कलंबक:
कालिका — चंडी
क्षामता
कपिकच्छु:
कृष्णदेवबल्लमूलं
मांसी
काकी
शृगाली
धूसरी
रोमावली
नवीनमेघ:
पटोलशाखा
मेघजालं
कालिंदी — यमुना
कालिंग: — भूमिकर्कारुक:
दंतपंक्ति:
सर्प:
राजकर्कटी
कालिंदीभेदन: — बलराम:
काली — भवानी
कालिका
क्षीरकीट:
मातृभेद:
अपवाद:
नवमेघचय:
कालीयकं — सरस्वती
कालीयकं
कालानुसार्यं
जापकं
कालेय: — दैत्यभेद:
कालेयक: — कालखंड:
दारुहरिद्रा
काव्यं — काव्य०
ग्रंथ:
काव्य: — शुक्र:
कावचिकं — कवचसमूह:
काव्या — पूतना

काकुकः उत्कुटः
चक्रवाकः
कावेरी पीतमस्तकपक्षी
नदीभेदः
वेश्या
हरिद्रा
काण्ड०
काण्डः काण्डः
इक्षुगंधा
पोटगलः
काण्डः देवशुः
कादम्बरी मधुपर्णं
काश्यपः मुनिभेदः
मृगभेदः
कणादः
काश्यपी पृथ्वी
काशिराजः धन्वन्तरिः
काश्मीरं कुंकुमं
पाषाणदारणः
पुष्करमूलं
काश्मीरजं कुष्ठ
केशरं
अतिविषा
काष्ठ०
काष्ठं काष्ठं
दारु
काष्ठी शालवृक्षः
काष्ठतक्षः रथकारः
काष्ठा दिक्
स्थितिः
उत्कर्षः
दारुहरिद्रा
कार्षापणः अष्टादशनिमेषाः
कर्षपरिमितवस्तु
कार्षिकः पणषोडशांशकः
कार्षिकः
कार्षापणः
काष्ठीला कदली
कास०
कासं तेजसद्रव्यं

कामरः म...
कामूः वि...
जी...
काहं०
काहलः कुक्कुटः
शुष्कमात्रं
शुष्कः
असंतं
खलः
काहली तरुणी
काहला अप्सरोभेदः
वाद्यभांडभेदः
काहं०
कीशा अमीवः
किं०
किं आरंभः
विकल्पः
प्रश्नः
निंदने
क्षेपः
संकल्पः
किक०
किंकरः सेवकः
किंकिणी क्षुद्रघंटिका
ॐ किण०
ॐ किड०
किच०
किंचित् अल्पे
किंचुलिकः किंचुलिकः कि
महीलता कि
गंडूपदः कि
गर्जः
ॐ किठ०
किज०
किंजल्कः केसरः
पुष्परेणुः
ॐ कित०
ॐ किञ०
किट
किटं ...

किरः — वनसूकरः
〃 — किठ
〃 — किढ
किण०
किण्वं — पापं
सुराबीजं
किणिही — अपामार्गः
कित०
कितवः — धूतकारः
धत्तूरः
मत्तः
वंचकः
〃 — किथ०
〃 — किध०
किन०
क्लिन्नं — आर्द्रवस्त्र
किंनरः — किंपुरुषः
तुरंगवदनः
मयुः
किन्नरेशः — कुबेरः
क्लिन्नाक्षः — गलिताक्षः
किंनु — प्रश्नः
वितर्कः
किप०
किंपचानः — कृपणः
किंपाकः — महाकालफलं
किंपुरुषः — अश्वः
लोकभेदः
〃 — किन्नरः
〃 — किफ०
किभ०
किम०
किमर — पलाशः
गृहं
किमरः — सुवर्णप्रतिमा
नागरंगः

किम् — संभावना
विकल्पः
क्रोधः

किमुत — विकल्पः
अत्यंतं
प्रश्नः
किमु०

क्रिया — उपायः
चेष्टा
आरंभः
कर्म
शठता
कारणं
चिकित्सा
पूजनं

क्रियावान् — निश्चयः
कर्मनियुक्तः
किर०

किरणः — अंशुः
मयूखः
अंशुः
गभस्तिः
घृणिः
रश्मिः
धृष्णिः
भानुः
करः
मरीचिः
दीधितिः

किरातः — म्लेच्छभेदः
भूनिंबः
तोवनः

किराता — चंडालभेदः
चमरवाहिनी स्त्री
भवानी

किराततिक्तः — कुट्टनी
किराततिक्तः
भूनिंबः
अनार्यतिक्तः [illegible]

किरिः — वनशूकरः

किरीटं — मुकुटं
किरिट०

संभाषं
वार्त्ता
किलासं विलय:
किलासं
सिध्म
त्वक्सुप्तिका
किलासी किलासविशिष्ट:
किल्बिषं पापं
रोग:
अपराध:
किलिंजक: कट:
किव०
किंवदंती जनश्रुति:
किश०
किसलयं पल्लव:
किंशारू धान्यशूकं
बाण:
कंकपक्षी
किकीदिवि: किकिदिव:
किंशुक: पलाश:
किशोर: अश्वशावक:
तैलपर्ण
सूर्य:
तरुणावस्था
किष०
किष्ट: किष्ट:
किकीदित:
किष्कु: वितस्तिप्रमाणं
सप्रकोष्ठकर:
किष्कुपर्वा वितस्ति:
वंश:
पोटगल:
किस०
किह०
कीक०
कीकस: कृमिजाति:

क्री

देशभेदः
देशभेदः
नितपाकी

कीख०
कीड०

कीच०

कीचकः देशभेदः
वाताहतसस्वनवंशः

कीठ०
कील०

कीट०

कीटकः कृमिजातिः
निष्ठुरः

कीड०

क्रीडा क्रीडा
खेला
कुर्दितं
केलिप्रकारः
अवज्ञा

कीढ०

कीण

कीर्णः विक्षिप्तः
आच्छन्नः
हिंसितः

कीत०

कीतकी यष्टिमधु

कीतकिका नीलवृक्षः

कीर्त्तिः कीर्त्तिः
यशः
समाज्ञा
विस्तारः
प्रसादः
कर्दमः

कीथ
कीध
कीन०

कंचुकः
उपांशुघाती

ॐ कीप०

ॐ कीय०

कीर०

कीरः शुकः
कश्मीरदेशः

कील०

कीलः अग्निज्वाला
कफोणिः
स्तंभः
शंकुः
शिवः

कीलकः वस्त्रादिबंधनस्तंभः

कीला वज्राघातः

कीलालं रक्तं
जलं
क्षीरं
पुष्परसः
मद्यं
मंडः
घृतं

कीलितः बद्धः

कीव०

क्लीबं नपुंसकः
षंढः
अविक्रमः

कीश०

कीशः वानरः
नग्नः

कीशपर्ण अपामार्गः

ॐ कीष०

ॐ कीस०

कु०

कुः निंदारलं
पापं
निंदा
ईषदर्थः

पार्थ्वा
ग्राह:
कुक० ॥
कुकर: कुकर: ॥
कुलि:
कुकुर: कौलेयक:
सारमेय:
मृगदंशक:
शुनक:
भषक:
श्वा
कुकुर: ग्रंथिपर्णी
कुंकुमं काश्मीरजं
अग्निशिखं
वरं
बाह्लीकं
पीतनं
रक्तसंकोचं
पिशुनं
धीरं
लोहितं
चंदनं
कुक्कुट: चरणायुध:
ताम्रचूड:
कृकवाकु:
कुक्कुट: निषादपुत्र:
शूद्रपुत्र:
अग्निकण:
कुंकुमं
लक्षणभेद:
कुक्कुटी अनृतचर्या
कुक्कुभ: काकभेद:
कुकुंदरं नितंबस्थकूपकद्वये
कुकूलं शंकुसंकीर्णखातं
श्वभ्रं
तुषाग्नि:
कुरव०

कुङ्ः	कुङ०
	क्रौंचपक्षी
	कुच०
कुचः	स्तनः
कुचंदनं	वृक्षभेदः
	रक्तचंदनं
कुंचितं	वक्रं
कुचेला	कुत्सितवस्त्रास्त्री
	विद्धकर्णी
कुं	कुछ०
कुजः	कुज०
	मंगलः
कुंजः	नरकासुरः
	लतागृहं
कुंजरः	हस्तिदंतः
	हस्ती
	केशः
कुंजरा	चैत्रवृक्षः
	धातुपुष्पिका
	पाटलिपुष्पं
कुंजलं	कांजिकं
कुंजराशनः	पिप्पलः
कुंजा	भवानी
कुं	कुञ०
कुं	कुञ्च०
	कुट०
कुटः	कलशः
	गृहं
	कोटः
	वृक्षः
कुटजः	अगस्तिः
	द्रोणः
कुटनी	निरिमद्रिका
	कुट्टनी
	शंभली
कुड्मलः	मुकुलः
	नरकांतरं
	पुष्पकभेदः

कुटारः	केवलः
	प्रीतिः
कुटिलं	कौलः
	कुटिलं
	अरालं
	वृजिनं
	जिह्मं
	ऊर्मिमत्
	कुंचितं
	नतं
	आविद्धं
	भुग्नं
	वेल्लितं
	वक्रं
कुटिला	नदी
कुटी	कुंभदासी
	मदिरा
	गृहं
	विचित्रगुच्छः
	गृहाधमद्या
कुटुंबव्यापृतः	कुटुंबव्यापृतः
	अभ्यागारिकः
	कुठ०
कुठः	कर्मकरणासमर्थः
	मूर्खः
कुंठरः	[illegible]थबंधनकारं
कुठारः	परदोषकथन[illegible]ः शीलः
	वृक्षः
	भांडागारः
कुठारः	परशुः
कुठेरकः	पर्णासवृक्षः
	कुड०
कुंडः	सधवाजारजपुत्रः
कुंडं	अग्न्याधारस्थानं
	परिमाणभेदः
	देवजलाशयः
	पात्रपात्रं

	भित्तिः
कुंडल	कुंडलं
	कर्णवेष्टनं
कुंडलः	पाशः
	वलयः
	कांचनारकः
कुंडला	गडूची
कुंडली	वरुणः
	मयूरः
कुडवः	सर्पः
	सकुंडलपुरुषः
कुंडकीटः	परिमाणभेदः
	चार्वाकवचनाभिज्ञपुरुषः
	जारज ब्राह्मणीपुत्रः
	दासीगामी
	पुंश्चलः
कुंडी	रोपथः
	सधवाजारजपुत्री
	कमंडलुः
ऽ	कुठ०
	कुण०
कुणपः	दुर्गंधः
कुणपी	शवः
	विट्सारिका
कुणिः	कुणिवृक्षः
	कुकरः
	कुत०
कुतः	प्रश्नं
	अपलापः
	पंचम्यर्थः
कुंतः	कुंतः
	प्रासः
	क्रोधाभावः
	क्षुद्रजंतुः
	गवेधुका
कुतू	क्रोधः
कुतपः	भगिनीपुत्रः
	वाद्यं
	छागकंबलः
	कुशः

	सूर्यः
	कन्यासुतः
	चर्मणः स्नेहपात्रं
	धान्यं
कुतपी	विद्[illegible]सारिका
कुतलः	पानपात्रं
	केशः
	यवः
	देशभेदः
	धूकपक्षी
कुतनुः	कुबेरः
कुत्सा	निंदा
कुत्सितः	अधमः
कुंती	पांडुपत्नी
	शल्लकी
	गुग्गुलुः
कुतुकं	कौतुकं
कुतूः	चर्मणः स्नेहपात्रं
कुतूहलं	कुतूहलं
	कौतुकं
	कौतूहलं
	कुतुकं
	कुथ०
कुथः	कुशः
	करिकंबलः
	प्रातःस्नायीद्विजः
	कुद०
कुंदः	कुंदः
	कौरटः
कुंदः	कुंदवृक्षः
	निधयंतरं
	विष्णुः
	चक्रभ्रमः
कुद्दलः	कांचनारः
	भूमिविदारणलोहास्त्रं
कुंडुकः	कुंडुकः
	पालकी पु
	मुकुंदः [illegible]
	कुंदः [illegible]

कुंडलकी कुंडलकी
गजभक्षा
कुबला
सुरभी
रसा
महारुणा
रसकी
हादिनी

२ कुध०

कुन०

कुनटी मनःशिला
नेपालदेशोद्भवमनःशिला

कुनाशं मृत्तिकाभांडं
काचपात्रं

कुनासकः यवासकः

कुप०

कुप्यं स्वर्णरजतातिरिक्तंधनं

कुर्परः कफोणिः

कुर्पासकः जातुदेशः
चोलः

कुपूरुषः अधमः

३ कुफ०

कुब०

कुब्जः कुब्जः
गडुलः

कुब्जकः वृक्षभेदः

कुबलं पद्मं
मुक्ताफलं
बदरविशेषः

कुब्जा अधोमुखवीत्का

कुभ०

कुंभः राशिभेदः
हस्तिशीर्षं
दैत्यभेदः
कामी
घटः
गुग्गुलः
कट्फलं
[illegible]

	उखा
	अल्पतनुः
कुंभकारः	कुंभकारः
कुंभयोनिः	कुलालः
	अगस्तिः
	वसिष्ठः
	द्रोणाचार्यः
कुंभा	वेश्या
कुंभिलः	चोरः
	श्लोकार्थचोरः
कुंभिका	श्यालः [illegible]
	कुंभिका
	वारिपर्णी [illegible]
कुंभी	कट्फलं
कुंभीरः	वक्रः
कुंभीनसः	कुंभीनसः
	मंडली [illegible]
कुंभीनसी	लवणासुरमाता
	कुम०
कुमारः	शुकदेवः
	स्कंदः
	युवराजः
	अश्ववारकः
	बालकः
	वरुणवृक्षः
	उत्कृष्टस्वर्णं
	शुकभेदः
कुमारी	कन्या
	अपराजिता
	गौरी
	कुमारीक्षेत्रं
	नदीभेदः
	घृतकुमारी
	नवमालिका
	रामतरुणी
कुमारकः	वरुणवृक्षः
कुमुदा -	गंभारी
कुमुदं	रक्तोत्पलं
	कैरवं
	जलकुंभी
	[illegible]

सर्पभेदः
वानरभेदः
कुमुदपुष्पं
कुमुत् रक्तोत्पलं
सपर्णः
कुमुदिका कट्फलं
कुमुद्वान् कुमुदप्रायदेशः
देशविशेषः
कुमुद्वती कुमुद्वती
कुमुदिनी
कुमुदबांधवः चंद्रः

कुर०

कुकरः कुररः
उत्क्रोशः
कुरंगमः मृगः
कुरंगः मृगः
कुरुबकः रक्तझिंटीभेदः
अम्लानझिंटीभेदः
कुरुः नृपांतरं
भक्तं
कुरुंटः दासनझिंटी
कुरुंटी दारुपुत्रिका
कुरुंटकः पीतझिंटी
कुरुक्षेत्रं अम्लानझिंटी
कुरुक्षेत्रं
विशालासनं
कुरुविस्तः पलपरिमितस्वर्णं
कुरुविंदः पद्मरागमणिः
मुस्ता
कुल्माषः

कुल०

कुलं जनपदः
वंशः
लोकः
शरीरं
सजातीयगणः
भवनं
कुल्यः वंशी
कुलोद्भवः

कुलेयोग्यः
कुल्यं अस्थि
अष्टद्रोणपरिमितं
कुलकः मांसं
वल्मीकः
काकेंदुः
कुलश्रेष्ठः
पटोलः
कुलटा संबद्धश्लोकसंहतिः
पुंश्चली
धर्षिणी
बंधकी
असती
इत्वरी
स्वैरिणी
पांशुला
भिक्षुकी
कुलधारकः दुहितापुत्रः
कुलस्त्री कुलस्त्री
कुलपालिका
कुलत्थिका धान्यविशेषः
कुलश्रेष्ठी शिल्पिश्रेष्ठः
कुलसंभवः सामान्यकुलोत्पन्नः
कुल्या अल्पाकृत्रिमासरित्
पयःप्रणाली
नदीभेदः
जीवंतिका
कुलाचलः महेंद्रः
मलयः
सह्यः
शुक्तिमान्
पारियात्रकः
ऋक्षः
विंध्यः
कुलायः कुलायं
नीडः
कुलायः स्थानमात्रं
कुलाली कुलाली
चक्षुष्या
कुलत्थिका
कुलालः कुकुभपक्षी
घटकारः
कुलिकः कौलिकः
[illegible]
[illegible]

कुलिशं	वज्रं
कुली	कंटकारी
कुलीनः	महाकुलः
	आर्यः
	सभ्यः
	सज्जनः
	साधुः
कुलीरः	कर्कटः
	कुव०
कुवलयं	उत्पलं
कुंथा	यज्ञस्थाने वस्त्रादिवेष्टनं
कुवादः	परदोषकथनशीलः
कुर्वाणः	भृत्यः
कुविंदः	प्रेरकः
	कुविंदः
	तंतुवायः
कुवेणी	मत्स्यनिक्षेपपात्रं
कुबेरः	कुबेरादिअमरस्थपर्यायाः
	नंदीवृक्षः
कुबेरकः	कुठारी
	कुबेरकः
	तुन्नः
	कुणिः
	कच्छः
	कांतलकः
कुबेराक्षी	पाटलिवृक्षः
	कुश०
कुशः	रामपुत्रः
	द्वीपभेदः
	पापिष्ठः
	मत्तः
	योक्त्रं
	दर्भः
कुशं	जलं
कुशलः	शिक्षितः
	कल्याणं
	पुण्यं
	पूर्णता
कुशा	रज्जुः
कुशाकुः	दुराचार
	सर्पः
	परपीडकः

७१

कुन्निकः
कुश्री लोहविकारः
कुशीलवः काले
नटश्रेष्ठः
कुशेशयं राम पुत्रो
पद्मं
कुष॰
कुष्ठं कुष्ठं
श्वित्रं
औषधिः
रोगभेदः
कुष्टं रोदनं
कुष्माण्डः शापुः
कुष्माण्डः
कर्कारुः
ह्रौलः
गणभेदः
कुष्माण्डी उमा
कुस॰
कुसीदं कुसीदं
वृद्धिजीविका
अर्थप्रयोगः
कुसीदिकः वृध्याजीवः
कुसुमं स्त्रीरजः
नेत्ररोगः
पुष्पं
फलं
कुसुम्भं सुवर्णं
कुसुम्भ
कमण्डलुः
पुष्पभेदः
कुसुमेषुः कामदेवः
कुस्तुम्बुरुः धन्याकं
कुसुमाञ्जनं कुसुमाञ्जनं
रीतिपुष्पं
पुष्पकेतुः
पौष्पकं
कुसृतिः शाठता
कुह॰
कुहरः संपातिरं

गह्वरं
छिद्रं

कुहना — पाखंडाचरणं
दंभलिंगः

कुहरितं — कोकिलालापः
सुरतध्वनिः

कुहूः — कोकिलालापः
नष्टेन्दुकला

कुक्षि०

कुक्षिः — उदरं

कुक्षिंभरिः — स्वोदरपूरकः

कूक०

कूकुदः — सत्कारपूर्वकालंकृतकन्यादानकर्त्ता

" — कूख०

" — कूड०

कूच०

कूर्चः — भ्रुवोर्मध्यभागः
[illegible] विकत्थनं
श्मश्रुः
धूर्तता

कूर्चशीर्षः — जीवकः

कूर्चिका — सूचिका
चित्रलेखनिका
कलिका
कपाटोद्घाटनकुञ्ची
क्षीरविकृतिः

" — कूछ०

" — कूज०

कूटः — कूट०
निश्चयः
राशिः
लोहमुद्गरः
दंडः
माया
पर्वतशृंगं
तुच्छः
हलाग्रभागः
यन्त्रं
धूर्त्तता

	हस्तिदन्त...
कूटकं	हलाग्रलग्न:
कूटस्थ:	कालव्यापी
कूटयंत्रं	कूटयंत्रं
	उत्साथ:
कूटशाल्मलि:	कूटशाल्मलि:
	रोचन:
	कूठ०
कूड:	धान्यादिस्तूप:
=	कूड०
=	कूथ०
कूर्दितं	(कुर्दितं)
	क्रीडा
=	कूध०
=	कूनं०
	कूफ०
कूप:	अन्धु:
	प्रहि:
	उदपानं
	उत्पान:
	गर्त्तावु:
	गुणवृक्ष:
कूपक:	गुणवृक्ष:
	कुकुन्दर:
	तैलपात्रं
	कूप:
	चिता
कूपका:	जलगतास्तरुशिलादय स्रोततो द्विधाकारिण:
कूर्पासक:	चोल:
कूपका	जलगतपाषाण:
	वापी
=	कूफ०
	कूब०
कूबर:	युगंधर:
	युंधर:
	कुब्जक:
=	कूम०
	कूर०
कूर्म:	कच्छप:

	कूप॰
	कूर॰
क्रूरः	कठिनः
	निर्दयः
	घोरः
	परद्रोहाचरणशीलः
क्रूरदृक्	विभुनः
	शनैश्चरः
कूलं	कूल॰
	रोधः
	तीरं
	प्रतीरं
	तटं
	राशिः
	सैन्यपृष्ठः
	तडागः
कूलकः	समूहः
	कृमिः
	पर्वतः
=	कूव॰
=	कूट॰
	कृक॰
कृकणः	क्रकरपक्षी
कृकवाकुः	मयूरः
	सरटः
	कुक्कुटः
कृकलासः	सरटः
कृकाटिका	घाटा
=	कृष॰
=	कृच॰
कृच्छ्रं	कृच्छ्र॰
	कष्टं
	पाप
	संतापः
कृतं	अलं
	विहितं
	हिंसितं
	पर्याप्तं
	सत्ययुगं
	[illegible]
	[illegible]

कृतं
kृत्स्नं समस्तं
जलं
कुक्षिः
कृतहस्तः कृतहस्तः
सुप्रयोगविशिखः
कृतपुंखवत्
कृतघ्नः कुकुरः
ममर्दाकर्त्ता
उपकारघ्नः
कृतमालः राजवृक्षः
कृतमुखः निपुणः
कृतलक्षणः प्रागादिगुणैः ख्यातः
कृतपुंखं अभ्यस्तवाणप्रयोगकर्त्ता
कृतसापत्निका अधिविन्ना
अध्यूढा
कृत्या
क्रिया
कृतांतः देवता
यमः
सिद्धांतः
दैवं
अकुशलकर्म
कृत्तिः चर्म
भूर्ज्जः
कृत्तिका
कृत्रिमं लवणभेदः
राल्लकी
रचितं
कृत्तिवासाः शिवः
कृत्रिमधूपकः नानासुगंधिकृतधूपः
कृती निपुणः
पंडितः
योगः
कृपणः
कृतनं
कृपः द्रोणः
कृपाणः कृपामलः
कर्दमः
खड्गः

	मतपचः
कृपा	दया
कृपाणः	खड्गः
कृपालुः	दयाशीलः
कृपाणी	कर्त्तरी
कृपी	द्रोणाचार्यपत्नी
कृपीटं	उदरं
कृपीटपालः	जलं
	केनिपातैः पुंलिंग
	समुद्रः
कृपीटयोनिः	अग्निः
	कृक०
	कृम०
कृमिः	कृम०
	कीटः
	लाक्षा
	कृमिलेश्वरः
कृमिजं	अगुरुः
कृमिघ्नः	विडंगः
कृमिकंटकं	चित्रः
	विडंगः
	उदुंबरः
	कृप०
	कृव०
	कृश०
कृशं	सूक्ष्मं
कृशः	दुर्बलः
कृशानुः	अग्निः
कृशानुरेताः	शिवः
कृशाश्वी	स्त्रीजीवी
	कृष०
कृष्णः	कृष्णवर्णः
	व्यासः
	काकः
	विष्णुः
कृष्णं	अर्जुनः

७४

कृशं	कृशं
	सौक्ष्मं
कृष्णला	कृष्णं
	गुंजा
कृषकः	हलः
	कृषीवलः
कृष्णफला	बाकुची
कृष्णकर्मा	पापाचारः
कृष्णभेदी	कटुरोहिणी
कृष्णवृंता	पाटलिवृक्षः
	माषपर्णी
कृष्णसारः	शिंशपा
	स्नुही
	मृगभेदः
कृष्णवर्त्मा	अग्निः
	दुराचारः
	राहुः
कृष्णपाकफला	करमर्दकः
	द्रोपदी
	पिप्पली
	नीली
कृषिः	भूमिकर्षणं
	वैश्यवृत्तिः
कृष्टिः	आकर्षणं
	पंडितः
कृषिकः	फालः
कृष्णिका	राजिका
कृषीवलः	कृषीवलः
	क्षेत्राजीवः
	कर्षकः
	कृषकः
॥	कॢप्त०
॥	कॢष्ट०
	केक०
केकरः	केकरः
	वलिरः
केका	मयूरवाणी
केकी	मयूरः
॥	केय०
॥	केन०

[illegible]	निमंत्रणं
	गृहं
	ध्वजः
	कृत्यं
केतकः	केतकः
	क्रकचच्छदः
केतुः	पृथिवी
	कांतिः
	पताका
	उत्पातः
	शत्रुः
	लक्ष्मं
॰॰	केप॰
	केद॰
केदारः	पर्वतभेदः
	शिवः
	क्षेत्रं
	मूर्तिभेदः
	आलवालं
॰॰	केध॰
	केन॰
केनिपातकः	जलपातीदीर्घदंडे
॰॰	केप॰
॰॰	केम॰
	केय॰
क्रेयः	क्रेतव्यमात्रं
केयूरं	केयूरं
	अंगदं
	केर॰
केरलः	देशभेदः
	ग्रंथभेदः
	केल॰
केलिः	केलिः
	देवनं
	नर्म
	केव॰
केवलं	विलं
	निर्णीतः
	एकः
	सकलः

केशः	चिकुरः
	कुन्तलः
	बालः
	कचः
	शिरोरुहः
	वृजनः
	ह्रीबेरः
क्लेशः	क्लेशः
	आदीनवः
	आस्रवः
	दुःखं
	कोपः
	व्यवसायः
केशटः	कणः
	शोषणं
	विष्णुः
	अजः
केशवः	ब्रह्मा
	पुन्नागः
	विष्णुः
	वकुकेशः
	केशी
केशवेशः	केशवेशः
केशपाशी	शिखा
केशहस्तः	केशसमूहः
केशपक्षः	केशसमूहः
केशपाशः	केशसमूहः
केशरः	किंजल्कः
	सिंहसटा
	पुन्नागः
	बकुलः
	नागकेशरः
केशरं	हिंगु
केशरी	सिंहः
	अश्वः
	नागकेशरः
	पुन्नागः
केशिकः	केशविशिष्टः
केशी	केशी
	केशवः

	चोरपुष्पी
	दैत्यभेदः
〃	केब०
〃	केह०
〃	केक०
〃	केञ०
कैटर्यः	केट०
	कट्फलं
कैटभः	दैत्यभेदः
कैटभजित्	विष्णुः
〃	केठ०
〃	केण०
कैतवं	केत०
	मिषः
	द्यूतं
	कितवः
	शत्रुः
〃	केथ०
	केद०
कैदार्यं	क्षेत्रसमूहः
कैदारिकं	क्षेत्रसमूहः
कैदारकं	क्षेत्रसमूहः
〃	केध०
〃	केप०
कैरवी	केर०
	ज्योत्स्ना
	कुमुदिनी
	गंधसोमं
	कंदोट्टः
	निशाहसः
	कैल०
कैलासः	कैलासः
	गणपर्वतः
	रजप्रस्थः
	कुवेराचलः
	शिवालयः
कैवर्तः	कैव०

	धीवरः
	जालिकः
	कोटी
	कुपिनी
कैवल्यं	मुक्तिः
कैवर्त्तमुस्तकं	कैवर्त्तमुस्तकं
	कुटन्नटं
	दाशपुरं
	वालेयं
	परिपेलवं
	प्लवं
	गोपुरं
	गोनर्दं
	केश०
कैश्यं	कैश्यं
	कैशिकं
	केशसमूहः
कैशिकः	रसभेदः
〃	कैष०
〃	कैद०
	कोक०
कोकः	चक्रवाकः
	वृकः
	ज्येष्ठः
	खर्जूरवृक्षः
	भेकः
	विष्णुः
कोकनदं	रक्तपंकजं
	रक्तकुमुदं
कोकनदच्छविः	रक्तवर्णः
कोकिलः	पिकः
	वनप्रियः
	परभृतः
	कृतद्दितः
	ताम्राक्षः
	काकपुष्टः
	कुहूमुखः
	मधुकण्ठः
	घोषयित्नुः
	कामतालः
	शृंगारः

कोकिलाक्षः — कोकिलाक्षः
इक्षुगंधा
कांडेक्षुः
इक्षुरः
क्षुरः

ऊ — कोख०
ऊ — कोङ्क०
कोजागरः — द्यूतपूर्णिमा
ऊ — कोस०
ऊ — कोज०

कोटरः — कोट०
कोटरः
कोट्टवी — निष्कुट्टः
नग्नास्त्री
कोट्टारः — दुर्गा
नागरः
कूपः
पुष्करिणी
कोटिः — पाटकः
धनुषोग्रं
अस्त्रः
संख्याभेदः
उत्कर्षः
आश्रयः
कोटिशः — लोष्टभेदः
कोटिरः — नकुलः
इंद्रगोपः
शूद्रः
कोटीरं — मुकुटं
जटा
कोठः — कोठ०
कोठः
मंडलकः

क्रोडः — क्रोड०
सूकरः
उत्संगः
वक्षस्थलं
जातिः

कोड०

कोकः	[illegible]
	गृहैकदेशः
	अग्निः
	लगुडः
ॐ	कोत॰
कोथः	कोथ॰
	नेत्ररोगः
	शटितः
कोदण्डः	कोद॰
	धनुः
	भ्रूः
	देशभेदः
कोद्रवः	कोद्रवः
	कोरदूषः
क्रोधः	क्रोध॰
	कोपः
	अमर्षः
	रोषः
	प्रतिघः
	रुट्
	क्रुत्
	भामः
क्रोधनः	कोपी
(कोपना	(कोपनशीला)
ॐ	कोन॰
	कोप॰
कोपः	क्रोधः
कोपना	कोपनशीला
कोपी	क्रोधनः
	अमर्षणः
ॐ	कोफ॰
ॐ	कोम॰
	क्लोम॰
क्लोमः	क्लोमः
	तिलकं
कोमलं	मृदुलं
	मृदु
कोमल[illegible]	सुकुमारः

...हप्रभेद:

कोर०

कोरक: कलिका
कल्लोल:
मृणालतन्तु:

कोरंगी सूक्ष्मैला

कोरदूष: कोद्रव:

कोल०

कोल: आन्वयिक:
सूकर:
वडुपं
वदरीफलं
शनैश्चर:
चित्रं
उत्संग:
परिरंभ:

कोलक: मरीचं
कंकोलं

कोलदलं नखऔषधि:

कोलवल्ली करिपिप्पली

कोलंबक: वीणायादंडादितप्रदेश:

कोलाहल: कोलाहल:
कलकल:

कोली पिप्पली
वदरी
चव्यं

कोव०

कोविद: पंडित:

कोविदार: कोविदार:
चमरिक:
कुद्दाल:
युगपत्रक:

कोश०

कोश: द्विसहस्रधनु:प्रमाणं

कोश: कुड्मल
पात्रं
परीक्षाप्रभेद:

भाण्डागारः
जातिफलं
खड्गः
शब्दादिसंग्रहः
पद्मान्तः
समुद्रः
दर्पणं
कृताकृतहेमरूप्यं

कोष०

कोषः — कृताकृतहेमरूप्यं
कुड्मलं
पात्रं
दिव्यं
खड्गपिधानं
जातिफलं
खड्गं
भाण्डारं
शब्दादिसंग्रहः

कोष्ठः — जठरमध्यं
गृहमध्यं
आत्मीयः
तण्डुलादिरचितधान्याधारः
शुकध्वनिः

कोष्णं — ईषदुष्णं

कोषफलं — कङ्कोलं

कोषातकी — ज्योत्स्नी

क्रोष्टा — घोषकः

क्रोष्टी — शृगालः
शृगाली
पातालकूष्माण्डः

क्रोष्टुविन्ना — जलपिप्पली
पृश्निपर्णी

कोस०

कोह०

कोहलः — मद्यभेदः
वाद्यशास्त्रप्रयोक्ता

कोह्न०

कोकुदिकः — कोक०
दम्भसारिक
दाम्भिकः

[illegible]	पश्चात्तापः
	अनुकरणं
〃	कौख०
〃	कौड००
	कौच०
क्रौंचः	क्रौंचः
	कुडः
	द्वीपभेदः
	पर्वतभेदः
क्रौंचदारणः	कार्त्तिकेयः
क्रौंचादनः	मृणालतंतुः
	पिप्पली
	चिंचा
〃	कौछ०
〃	कौञ०
	कौट०
कौटतक्षः	कौटतक्षः
	अनधीनकः
कौटिकः	मांसिकः
〃	कौठ०
〃	कौढ०
	कौण०
कौणपः	राक्षसः
	कौत०
कौंतिकः	कुंतायुधधारी
कौंती	रेणुकौषधिः
कौतुकं	अभिलाषः
	उत्सवः
	हर्षः
	लीला
	परंपरायातमंगलं
	ख्यातः
	भोग्यवस्तु
	कुतूहलं
	विवाहसूत्रं
	गीतादिभोगः
कौतूहलं	कुतूहलं
	प्रशस्तं
〃	कौथ०
	कौद०

कौद्रवी	
”	कौध०
”	कौन०
	कौप०
कौपीनं	अकार्यं
	वस्त्रखंडं
	गुह्यप्रदेशः
”	कौफ०
”	कौभ०
	कौम०
कौमारी	मातृभेदः
कौमुदः	कार्त्तिकः
कौमुदी	ज्योत्स्ना
कौमुदी	विष्णुगदा
”	कौय०
	कौर०
	कौल०
कौलटेरः	असतीसुतः
कौलटेयः	सतीभिक्षुकीसुतः
कौलटिनेयः	असतीसुतः
	सतीभिक्षुकीपुत्रः
कौलीनं	गुह्यं
	कुकर्म
	कुलीनत्वं
	सर्पयुद्धं
	पशुयुद्धं
	पक्षियुद्धं
	जनवादः
कौलेयकः	कुक्कुरः
	कुलीनः
”	कौव०
	कौश०
कौशिकः	नकुलः
	सर्पग्राही
	गुग्गुलुः
	इन्द्रः
	कोशज्ञः

श्वामित्रः

कौशिकी नदीभेदः
भवानी
स्त्री

कौष॰
कौषेयं कौषेयं
कृमिकोशोत्थं

कौस॰

कौस्तुभः विष्णुमणिः

〃 कौट॰
कौन्त॰
कौक्षेयकः खड्गः

इति शब्दसंदर्भसिंधौ ककारतरंगः

ख॰
खं शून्यं
इंद्रियं
सुखं
पुरं
क्षेत्रं
शून्यं
बिंदुः
आकाशं
स्वर्गः
ज्ञानं
बुद्धिः

〃 खक॰
〃 खख॰

खगः पक्षी
सूर्यः
देवः
ग्रहः
बाणः

खर्गः ख्वर्गः बुद्धमामात्य

खगेश्वरः त्रिदिवः
गरुडः

〃 खघ॰
〃 खङ॰

खज॰
खंजः खंजः

खंजनः	खंजरीटः
	भद्रनामा
	रतनिधिः
	कणाटीनः
	कृकच्छदः
	खंजखेलः
	तातलः
	मुनिपुत्रकः
	सर्षपः
	गमने
	बधिरः
खञ्जा	मेघनरेडः
	चपेटः
खंजा	छंदभेदः
	कुटिलचरणा
खजाका	दर्विः
खर्जूः	कंबिः
	कीटभेदः
	खर्जूरी
खर्जूरः	कंडुः
	खर्जूरवृक्षः
	धनामयः
खर्जूरी	वृक्षभेदः
खर्जूरं	रौप्यं
	कीटः
	खजः
〃	खड्ग०
〃	खञ्ज०
खटः	खट०
	कूपः
	कफः
	आयुधांतरं
	टंकः
खट्वा	मंचः
	पर्यंकः
	पल्यंकः
खट्वांगः	रज्जुखट्वा
	चिता
	पर्यंकावयवं
	शस्त्रं
	डमरुः
	शवः
〃	खड०

ड	खड०
	खड्डं
	मितं
खंडः	शाकलं
	इक्षुविकारः
खण्डः	मणिभेदः
	पात्रांतरं
	भेदः
	छेदः
खड्गः	निस्त्रिंशः
	चंद्रहासः
	असिः
	रिष्टिः
	कौक्षेयकः
	मण्डलाग्रः
	करवालः
	कृपाणः
	गंडकशृंगं
	गंडकः
खड्गधेनुः	बौद्धप्रभेदः
	खड्गपुत्रिका
	गंडकस्त्री
खंडपरशुः	परशुरामः
	शिवः
	चूर्णलेपी
	शङ्खः
	खंड्गामलकओषधिः
खंडाग्रं	अभ्रलेशः
	स्त्रीदंतक्षतांतरं
खड्गारीटः	फलकः
	असिधारा
खंड्गिकः	व्रतधारी
	कलापः
खड्गिकः	महीषीक्षीरफेनं
खड्गी	सैनिकः
	बुद्धभेदः
	गंडकः
	मंजुवाक्
	खड्गधरः
	खत०
खतक्	अंधकारः
	खद०
खदिरः	खदिरः
	गायत्री

81

खदिरी	शाकभेदः
खद्योतः	खद्योतः
	ज्योतिरिंगणः [illegible]
	सूर्यः
उ	खध०
	खन०
खनकः	मूषकः
	संधिचोरः
	अवदारणं
खनिः	खनिः
	आकरः
खनित्रं	खनित्रं
	अवदारणं
	खप०
खर्परः	तस्करः
	धूर्तः
	भिक्षापात्रं
	कपालः
खपुरः	गुवाकः
	भद्रमुस्तकः
	अलसः
	घोटा
उ	खपु०
खर्वं	खब०
	संख्याभेदः
	ह्रस्वः
	वामनः
उ	खर्व०
	खम०
खर्मं	पौरुषं
	पट्टवस्त्रं
	खय०
खरः	खर०
	गर्दभः
	तीक्ष्णः
	घर्मः
खरणाः	अश्वतरः
	खरणाः
	खरणसः
खरपुष्पा	बर्बरा
खरमंजरी	अपामार्गः
खरा	देवताडः
खराश्वा	यवानिका

...पतः
मौर्वं
नादाचः
उपधानं

खरुः — दर्पः
शिवः
अश्वः
दन्तः
श्वेतः

खल०

खलः — सस्यस्थानं
क्रूरः
कल्कः
नीचः
अधमः

खलपूः — खलपूः
बहुकरः

खलः — गर्त्तः
वस्त्रप्रभेदः
चर्म
चातकः
खिल्वाटः

खल्या — खल्या
खलिनी

खलिनी — खलानां समूहः
तालपत्र

खली — हस्तपादावमर्द्दनाख्यरुक्

खलीनः — अश्वसम्बन्धि लोहमयवस्तु

खलु — अनुनयः
वाक्यालंकारः
निषेधः
जिज्ञासा
मानेः
वीप्सा
सान्त्वनं

ॐ — खव०

ॐ — खश०

खस०

खसः — क्रोधः
बलात्कारः

खसमः — बुद्धः

ॐ — खह०

ॐ — खद०

ॐ — ...

खातिः	खाट०
	देकगढे
	ञावरथः
	क्रिणः
〃	खाड०
〃	खाण०
खातः	खात०
	पुष्करिणी
	गर्त्तः
ख्यातः	प्रथितः
	प्रतीतः
	वित्तः
	विज्ञातः
	विश्रुतः
ख्यातगर्हणः	ख्यातगर्हणः
	अवगीतः
ख्यातिः	प्रसिद्धिः
〃	खाथ०
	खाद०
खादितं	भुक्तद्रव्यं
〃	खाध०
〃	खाथ०
	खार०
खारी	परिमाणविशेषः
खारिकः	खारीवापक्षेत्रं
〃	खाल०
〃	खाह्न०
〃	खिक
〃	खिद०
	खिध०
खिंखिरः	शृगालिकाभेदः
	खट्वांग
〃	मेघः
〃	खिन०
〃	खिर०
	खिल०
खिलं	अप्रहतः
	सारस्वितः

	खिव०
〃	खिन्न०
〃	खी०
〃	खुक०
〃	खुय०
	खुर०
खुरः	खुरः
	ग्रोफः
	कोलदलं
खुरणाः	नीचनासिकः
खुरणसः	तदेव
〃	खुल०
〃	खुल्ल०
〃	खू०
〃	खेक०
〃	खेट०
खेचरः	खेच०
	देवः
	पक्षी
	विद्याधरः
〃	खेछ०
〃	खेज०
खेटः	खेट०
	गर्ह्यः
	कफः
	ग्रामभेदः
	चर्मास्त्रं
	अस्त्रं
	नासिकामलं
〃	खेठ०
〃	खेम०
खेयं	खेय०
	परिखा
〃	खेर०
खेला	खेल०
	क्री
〃	खेव०
〃	खेव०

८३

ॐ

ॐ खोक०

ॐ कोठ०

कखोड०

खोडः खंजः

ॐ खोढ०

ॐ खोर०

खोलकः खोल०

पाकः

शिरस्त्राता

वल्मीकः

पूगः

कोषः

सर्वांगिणावरपटः

ॐ खोव०

ॐ खोह्न०

ॐ खो०

इतिश्रीसुखनंदभर्णिधोरवकारतरंगः

ग०

गः गणपतिः

गंधर्वः

गी गान्नं

ॐ गक०

ॐ गख०

गग०

गगनं आकाशनं

गर्गरी दधिमंथनपात्रं

कलशी

गर्गरः मीनभेदः

गर्गः

किंचुलुकः

मुनिभेदः

गंगा

अच्छगा

गांदिनी

हैमवती

उमरीखरा

धर्मद्रवी

सिंधुबंधुः

गंगाधरः

ॐ गघ०
ॐ गछ०
गज०
गजः मानभेदः
हस्ती
वास्तुस्थानभेदः
गंजः योगभेदः कुंजः ८
अवली
भांडागारः
निकुंजः
हनुः
गजता गजता
हास्तिकं
गर्जनं शब्दः
कोपः
गजभक्ष्या सुगंधिद्रव्यविशेषः
गजबंधिनी गजबंधिनी
वारि
गंजा खनिः
मदिरागृहं
गजाह्वा गजपिप्पली
गजाह्वं हस्तिनापुरं
गजाननः गणेशः
गर्जितं स्तनितं
मेघनिर्घोषः
रसितं
गर्जितः मत्तहस्ती
ॐ गञ०
ॐ गढ०
गड०
गडः मीनभेदः
विघ्नः
गंडः गंडः
कटः
ग्रहभेदः
खड्गी
योगभेदः
पिटकः
चिह्नं
वीरः
हयभूषणं
बुद्बुदः

गडुकः	गडुकः
	शकुलार्भकः
गंडकः	पशुभेदः
	संख्याभेदः
	विद्याश्रमभेदः
	अवच्छेदः
	अंतरायः
गंडकी	नदीभेदः
गंडशैलः	गिरेश्च्युतस्थूलोपलः
	ललाटः
गंडकारी	गंडकारी
	नमस्कारी
	समंगा
	खदिरी
गंडा	रोचनिका
	नीली
गंडाली	गंडाली
	गोलोमी
	शतवीर्या
	शकुलादकः
गंडीरः	गंडीरः
	समष्ठिला
गडुः	पृष्ठरोगः
	कुब्जः
	उदरं
गडुलः	कुब्जः
गंडूषः	मुखपूर्त्तांभः
	पुष्करः
	हस्तोन्मितवस्तु
गंडूपदः	किंचुलुकः
गंडूपदी	किंचुलुकी
	जलौका

गठं

	गलं
गलः	मथमसंख्या
	सैन्यभेदः
	समूहः
गलकः	गलकः
	सांवत्सरः
	ज्योतिषिकः
	दैवज्ञः
	मौहूर्तिकः

ज्ञानी
कार्त्तिकः
गणरात्रं निशासमूहः
गणनीयं गणनीयं
गण्यं
गणेयं
गणरूपः मंदारः
गणहासकः धनहरी
गणाधिपः गणेशः
गणिकः दैवज्ञः
गणिका यूथी
वेश्या
हस्तिनी
यूथीपुष्पं
तर्कारी
गणितं गणितं
संख्यातं
गणिकारिका गणिकारिका
श्रीपर्णी
अग्निमंथः
कलिका
जया
गणेयं गणनीयद्रव्यं
गणेरुः कर्णिकारः
पर्वतः
गन्धः
करेणी
गणेरुका कुट्टिनी
गणोत्साहः गंडकः
गत०
गर्त्तः गर्त्तः
अवटः
त्रिगर्त्तभेदः
कुकुंदरः
गतं विज्ञातं
यातं
गतनासिकः गतनासिकः
विग्रहः
गतिः मार्गः
अवस्था
ज्ञानं
यात्रा
अभ्युपायः
नाडीव्रणः
पद्धतिः

गत्री	वृषवाहशकट
ग्रंथः	गन्थ०
	ग्रथनं
	धनं
	शास्त्रं
	शाष्मेलनं
	द्वाविंशद्वर्णनिर्मितश्लोकः
ग्रंथिः	ग्रंथिः
	पर्वः
	परुः
	ग्रंथिपर्णः
	बंधः
	रुग्भेदः
ग्रंथितं	ग्रंथितं
	ग्रथितं
	दृब्धं
	गुम्फितं
	आक्रांतं
	हिंसितं
ग्रंथिकः	पिप्पलीमूलं
	गुग्गुलुः
	ग्रंथिपर्णः
	करीरः
	दैवज्ञः
	सहदेवः
	पार्थः
ग्रंथिलः	विकंकतवृक्षः
	करीरवृक्षः
	ग्रंथिसहितः
ग्रंथिपर्णः	ग्रंथिपर्णः
	शुकः
	बर्हिः
	पुष्पं
	स्थौणेयः
	कुक्कुरः
गदः	गद०
	कृष्णभ्राता
	रोगः
गर्दभः	रासभः
	चक्रीवंतः
	[illegible]

	…धद्रव्यभेदः
गर्दभी	श्वेतकुमुदं
	क्षुद्रजंतुः
	रोगभेदः
गर्दभांडः	गर्दभांडः
	कंदरालः
	कपीतनः
	सुपार्श्वकः
गदा	आयुधभेदः
	गंध०
गंधः	गंधकः
	आमोदः
	लेशः
	संबंधः
	गर्वः
गंधनं	उत्साहः
	प्रकाशः
	सूचनं
	हिंसा
गंधकः	गंधकः
	सौगंधिकः
	गंधाश्म
गंधर्वः	देवयोनिः
	मृगभेदः
	घोटकः
	अंतराभवसत्वं
	दिव्यगायनं
	पुंस्कोकिलः
	गायनमात्रं
	पशुभेदः
गंधवती	व्यासमाता
	नगरीभेदः
	मदिरा
	पृथ्वी
गंधवहः	पवनः
गंधवाहः	पवनः
गंधवहा	नासिका
गंधसारः	चंदनः
गंधरसः	गंधरसः
	[illegible]लः
	प्राणः
	पिंडः

गंधकुटी मुराख्यौषधिः
गंधमूली शटी
गंधफली प्रियंगुः
चंपककलिका
गंधमादनः गंधकः
पर्वतभेदः
भ्रमरः
वानरभेदः
गंधनाकुली रास्ना
गंधर्वहस्तकः एरंडः
गंधाश्म गंधकः
गंधिनी मुराख्यौषधिः
गंधोली वरटा
गंधोली शटी
भद्रा
गंधोत्तमा मदिरा
गन०
गफ०
गर्वः गव०
अहंकारः
गर्वाटः बलेयः
द्वास्थः
गर्भः गभ०
गर्भः
भ्रूणः
बालकः
कुक्षिः
सन्धिः
गर्भकः पनसकंटकः
केशमध्यविन्यस्तमाल्यं
गभस्तिहस्तः सूर्यः
गर्भांडः नाभागुडकः
गभस्तिः किरणः
सूर्यः
गंधारी त्वोहा
मधुपर्णिका
गर्भाशयः गर्भाशयः
जरायुः
उद्वे
कलिलं
गर्भाशयः
गर्भवेष्टनं

गर्भिणी	गर्भिणी
	आपन्नसत्वा
	अंतर्वत्नी
गंभीरं	गंभीरं
	निम्नं
गंभीरवेदी	अंकुशाद्युद्धरहस्ती
गमः	गम०
	असंविवृत्तिः
	अपर्यालोचितमार्गः
गम्यं	गमनं
गमनं	प्राप्यं
	गतिः
गर्मुत्	स्वर्णं
	लता
गयः	गय०
	पशुभेदः
	राजर्षिभेदः
गया	तीर्थं
गरः	गर०
	व्याधिः
	उपविषं
	विषं
	मयूरः
गरलं	करणभेदः
	तृणराशिः
	विषं
	मानभेदः
गरिष्ठः	अतिगुरुः
गरिमा	सिद्धिभेदः
गरी	देवताडवृक्षः
गरुत्	पक्षः
गरुडः	गरुत्मान्
गरुत्मान्	गरुडः
	पक्षिमात्रं
गरुडोधा	भारतीपक्षी
गरुडाग्रजः	अरुणः
गरुडध्वजः	विष्णुः
गलः	गल०
	गलः
	कंठः
	सर्जरसः
गलंतिका	गलंतिका
	आलुः
	ककरी

गल्या	गलसमूहः
गलितं	पतितद्रव्यं
गव्यं	गव०
	प्रत्यङ्ग
	गोद्रव्ये
	गोदुग्धादि
	गोहितं
गवलं	गोसमूहः
	महिषशृङ्गः
गवयः	गवयः
	गवानूकः
गव्या	गव्या
	गोत्रा
गवाक्षः	गवाक्षः
	वातायनं
	जालकः
गवाक्षी	वानरभेदः
	गोतुंबी
गवादनी	इंद्रवारुणी
	इंद्रवारुणी
	गवादनी
गव्यूतिः	क्रोशयुगं
गवेधूः	देवधान्यं
गवेषितं	अन्वेषितं
गवेषणं	अन्वेषणं
,,	गश०
,,	गष०
	गस०
ग्रस्तं	मुक्तद्रव्यं
ग्रस्तं	लुप्तवर्णवचनं
	मुक्तद्रव्यं
ग्रहः	गह०
	ग्रहः
	उपरागः
	निर्बंधः
	निग्रहः
	ग्रहणं
	रविप्रमुखः

सन्निर्मितः गन्धयोधीरजन
प्रमोदजनकः सेदरूपमा
नः सुरर्वपं डित्यप्रदस्य
थौनवपुरे षर्वः समाप्तिंग
तः ॥२॥

इति श्रीसर्वज्ञगण्यगुरुकाश्मी
कपततर्कोलंकारपंडितेंद्र
दे[illegible]हुर्यविरचितस्य
कातन्त्रलघुवृत्तौ
चात्रातमसः ...
संदर्नेसिद्धः समाप्तः
श्रीशरक कल्याणमस्तु:

संवत् १८६३ मिति फाल्गु
ण शुक्ल १४ रवौ लिखितं
[redacted]
र्थम्। ॥श्रीगुरुर्जयतितराम्॥

४४

रघुपुत्रः

नं. ४२६